॥ तंत्रसारसंग्रहप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिःॐ॥ जयत्यजभवेशेंद्रवंदितःकमलापतिः ॥ अनंतविभवानंदशक्तिज्ञानादिसद्गुणः ॥१॥ विधिंविधायसर्गादौतेनपृष्टोजलोचनः ॥ आहदेवोरमोत्संगविलसत्पादपल्लवः ॥२॥ अहमेकोखिलगुणोवाचकःप्रणवोमम ॥ आकराद्यतिशांतांतःसोयमष्टाक्षरोमतः॥३॥ सविश्वतैजसप्राज्ञतुरीयात्मांतरात्मनां ॥ परमात्मज्ञानात्मयुजांमद्रूपाणांचवाचकः॥४॥ तद्रूपभेदाःपंचाशन्मूर्तयोममचापराः॥ पंचाशद्वर्णवाच्यास्तावर्णास्तारार्णभेदिताः ॥५॥ द्विरष्टपंचकचतुःपंचेत्येवाष्टवर्गगाः॥ अजआनंदइंद्रेशावुग्रऊर्जऋतुंभरः॥६॥ ऋघलृशौलृजिरेकाभैरओजोभृदौरसः ॥ अंतोर्धगर्भःकपिलःखपतिर्गरुडासनः॥७॥ घर्मोङ्सारश्चार्वंगश्छंदोगम्योजनार्दनः॥ झाटितारिर्जमःष्टंकीठलकोडरकोढरी॥८॥णात्मातारस्थपोदंडीधन्वीनम्यःपरःफली॥बलीभगोमनुर्यज्ञोरामोलक्ष्मीपतिर्वरः॥९॥ शांतसंवित्षड्गुणश्चसारात्माहंसळाळुकौ॥ पंचाशन्मूर्तयस्त्वेताममाकारादिलक्षकाः॥१०॥ नारायणाष्टाक्षरश्चताराष्टाक्षरभेदवान् ॥ आद्यैस्तारचतुर्वर्णैर्भिन्नाव्याहृतयःक्रमात् ॥११॥ अनिरुद्धादिकास्तासांदेवताव्युत्क्रमेणवा ॥ ताश्चतन्मूर्तयस्त्वेवद्वादशार्णपदोदिताः ॥१२॥ नारायणाष्टाक्षराच्चव्याहृतिभ्यस्तथैवच ॥

विभेदोद्वादशार्णानांकेशवाद्याश्चदेवताः ॥१३॥ नारायणाष्टाक्षराच्चव्याहृतित्रिगुणात्पुनः ॥ वेदमातातुगा
यत्रीद्विगुणाद्वादशाक्षरात् ॥१४॥ चतुर्विंशन्मूर्तयोस्याःकथितावर्णदेवताः ॥ तद्भेदःपौरुषंसूक्तंवेदाःपुरुष
सूक्तगाः॥१५॥ वैदिकाःसर्वशब्दाश्चतस्मात्सर्वाभिधोस्म्यहं॥पंचाशद्वर्णभिन्नाश्चसर्वशब्दाअतोपिच॥१६॥
ऋषिश्चदेवतैकोहंतारादीनांविशेषतः ॥ छंदोमदीयागायत्रीताराष्टाक्षरयोर्मता ॥१७॥ उद्यद्भास्वत्समाभा
सश्चिदानंदैकदेहवान् ॥ चक्रशंखगदापद्मधरोध्येयोहमीश्वरः ॥१८॥ लक्ष्मीधराभ्यामाश्लिष्टःस्वमूर्तिगणम
ध्यगः ॥१९॥ ब्रह्मवायुशिवाहीशविपैःशक्रादिकैरपि ॥ सेव्यमानोधिकंभक्त्यानित्यनिःशेषशक्तिमान्॥२०॥
मूर्तयोष्टावपिध्येयाश्चक्रशंखवराभयैः ॥ युक्ताःप्रदीपवर्णाश्चसर्वाभरणभूषिताः ॥२१॥ तादृग्रूपाश्चपंचाश
ज्ज्ञानमुद्राभयोद्यताः॥ टंकीदंडीचधन्वीचतत्तद्युक्तास्तुवामतः ॥२२॥ वासुदेवादिकाःशुक्लरक्तपीतासितो
ज्ज्वलाः॥ चक्रशंखगदाब्जेतःप्रथमोमुसलीहली ॥२३॥ सशंखचक्रस्त्वपरस्तृतीयःशार्ङ्गबाणवान् ॥ सचक्र
शंखस्तुर्यस्तुचक्रशंखासिचर्मवान् ॥२४॥ केशवोमधुसूदनःसंकर्षणदामोदरौ ॥ सवासुदेवःप्रद्युम्नोदक्षोच्च
करशंखिनः॥२५॥ विष्णुमाधवानिरुद्धपुरुषोत्तमाधोक्षजाः॥जनार्दनश्चवामोच्चकरस्थितदरामताः ॥२६॥

गोविंदश्चत्रिविक्रमःसश्रीधरहृषीकपः॥ नृसिंहश्चाच्युतश्चैववामाधःकरशंखिनः ॥२७॥ वामनःसनारायणः पद्मनाभउपेंद्रकः॥ हरिःकृष्णश्चदक्षाधःकरशंखधरामताः॥२८॥ शंखचक्रगदापद्मधराश्चैतेहिसर्वशः॥ क्रमव्युत्क्रमपद्मादिगदादिव्युत्क्रमस्तथा ॥२९॥ अर्धक्रमःसांतरश्चषट्सुषट्स्वरिपूर्विणां ॥ वर्णानांदेवतानां चनित्यत्वान्नक्रमःस्वतः॥३०॥ व्यक्तिक्रमंब्रह्मबुद्धावपेक्ष्यक्रमउच्यते ॥ समासव्यासयोगेनव्याहृतीनांचतुष्टयं ॥३१॥ सत्यंचांगानितारस्यप्रोच्यंतेष्टाक्षरस्यच ॥ कृद्धमहावीरद्युसहस्रसहितोल्ककाः ॥३२॥ चतुर्थ्यंताहृदादीनिपृथग्रूपाणितानिच ॥ विष्णोरेवात्यभेदेपितदैश्वर्यात्तदन्यवत् ॥३३॥ चक्रशंखवराभीतिहस्तान्येतानिसर्वशः॥ मूलरूपसवर्णानिकृष्णवर्णाशिखोच्यते ॥३४॥ चतुर्विंशन्मूर्तयश्चमूलरूपसवर्णकाः॥ आदिवर्णत्रयंनाभिहृच्छिरस्सुयथाक्रमं ॥३५॥ न्यसनीयंचतद्वर्णदेवताध्यानपूर्वकं ॥ पज्जानुनाभीहृदयवाङ्नासानेत्रकेषुच ॥३६॥ अष्टाक्षराणांन्यासःस्याद्व्याहृतीनांप्रजापतिः॥ मुनिश्छंदस्तुगायत्रीदेवताभगवान्हरिः ॥३७॥ उद्यदादित्यवर्णश्चज्ञानमुद्राभयोद्यतः ॥ तारेणव्याहृतीभिश्चज्ञेयान्यंगानिपंचच ॥३८॥ नाभिहृत्केषुसर्वेषुचतस्रोव्याहृतीर्न्यसेत् ॥ द्वादशार्णस्यजगतीच्छंदोन्यत्तारवत्स्मृतं ॥३९॥ अच्छवर्णोभय

वरकरोध्येयोमितद्युतिः॥ पदैर्व्यस्तैःसमस्तैश्चज्ञेयान्यंगानिपंचच ॥४०॥ अष्टाक्षराणांस्थानेषुबाह्वोरूर्वोश्च विन्यसेत् ॥ विश्वामित्रस्तुसंध्यार्थेतदन्यत्रप्रजापतिः ॥ मुनिर्देवस्तुसवितृनामास्रष्टृत्वतोहरिः ॥४१॥ प्रोद्य दादित्यवर्णश्चसूर्यमंडलमध्यगः॥ चक्रशंखधरोंकस्थदोर्द्वयोध्येयएवच ॥४२॥ सताराश्चव्याहृतयोगायत्र्यं गानिपंचच ॥ दोःपत्संधिषुसाग्रेषुनाभिहृन्मुखकेषुच ॥ ४३ ॥ वर्णन्यासश्चकर्तव्यस्तारवन्निखिलंस्मृतं ॥ पंचाशदक्षराणांचपुंसूक्तस्यापिसर्वशः ॥४४॥ अनुष्टुभश्चत्रिष्टुप्चच्छंदोस्यत्रिष्टुभोपिवा ॥ विष्णुशब्दश्चतु र्थ्यंतोहृदयेतःषडक्षरः॥४५॥ तारवत्सर्वमस्यापिश्यामोध्येयोहरिःस्वयं ॥ वर्णाएवषडंगानिषणयोर्भेदयोग तः ॥४६॥ पज्जानुनाभिहृन्नासाकेषुन्यासश्चवर्णशः ॥ एतेतुसर्वमंत्राणांमूलमंत्राविशेषतः ॥४७॥ एतज्ज्ञा नात्समस्तंचज्ञातंस्याच्छब्दगोचरं ॥ एतज्जपात्समस्तानांमंत्राणांजापकोभवेत् ॥४८॥ पूज्यश्चभगवान्नित्यं चक्राज्जादिकमंडले ॥ हृदयेवाचलेवापिजलेवाकेवलस्थले ॥४९॥ अष्टाक्षरेणसंपूज्यप्रथमंदेवतांपरां ॥ म ध्येसव्येगुरूंश्चैवदक्षिणेसर्वदेवताः॥५०॥ पुनःसव्येसर्वगुरूनाग्नेयादिषुचक्रमात् ॥ गरुडंव्यासदेवंचदुर्गांचै वसरस्वतीं ॥५१॥ धर्मंज्ञानंचवैराग्यमैश्वर्यंचैवकोणगान् ॥ तदंतःपूर्वदिक्पूर्वमधर्मादींश्चपूजयेत् ॥५२॥

अपूजिताअधर्मादिदातारस्तेतथाभिधाः॥ निर्ऋतिश्चैवदुर्गाचकामोरुद्रश्चदेवताः॥५३॥ यमवायुशिवेंद्राश्च
ज्ञेयाधर्मादिदेवताः ॥ परमःपुरुषोमध्येशक्तिराधाररूपिणी ॥५४॥ कूर्मोनंतश्चपृथिवीक्षीरसागरएवच ॥
श्वेतद्वीपोमंटपश्चदिव्यरत्नमयोमहान् ॥५५॥ पद्ममेतत्रयंदेवीरमैवबहुरूपिणी ॥ सूर्यसोमहुताशाश्चपद्मेश्री
स्त्रिगुणात्मिका ॥ ५६ ॥ आत्मांतरात्मपरमज्ञानात्मानश्चमूर्तयः ॥ विमलोत्कर्षणीज्ञानाक्रियायोगातथैवच
॥५७॥ प्रह्वीसत्यातथेशानानुग्रहाचेतिशक्तयः॥ अष्टदिक्षुचमध्येचस्वरूपाण्येवताहरेः ॥५८॥ ततोनंतंयोग
पीठस्वरूपंपूजयेद्धरेः॥ तत्रावाह्यहरिंचार्घ्यंपाद्यमाचमनीयकं ॥ ५९ ॥ मधुपर्कंपुनश्चार्चास्नानंवासोविभूष
णं॥ उपवीतासनेदत्वागंधपुष्पेतथैवच ॥६०॥ लक्ष्मीधरेयजेत्तत्रपार्श्वयोरुभयोर्हरेः ॥ हृदयादींस्तथेंद्रादिदि
क्ष्वस्त्रंकोणकेषुच ॥ ६१ ॥ वासुदेवादिकान्दिक्षुकेशवादींस्ततःपरं ॥ मत्स्यकूर्मवराहांश्चनारसिंहंचवामनं
॥६२॥ भार्गवंराघवंकृष्णंबुद्धंकल्किनमेवच ॥ अनंतंविश्वरूपंचतद्बहिःपूजयेत्क्रमात् ॥ ६३ ॥ अनंतब्रह्मवा
य्वीशान्वीशंचाग्रेप्रपूजयेत् ॥ वारुणींचैवगायत्रींभारतींगिरिजामपि ॥६४॥ कोणेषुवींद्रवामेचसौपर्णींपूज
येदपि ॥ इंद्रादीञ्छेषविध्यंतान्सभार्यान्सपरिग्रहान् ॥६५॥ धूपदीपौततोदत्वानैवेद्यंमूलमंत्रतः॥अनेनक्रम

योगेनजुहुयात्संस्कृतेऽनले ॥६६॥ पुष्पांजलिश्चहोमश्चमूलेनाष्टोत्तरंशतं ॥ सकृत्सकृत्पुष्पमन्यैर्होमस्तस्य चतुर्गुणः ॥६७॥ विसर्जयित्वानैवेद्यंमूलेनत्रिःसमर्च्यच ॥ धूपदीपौपुनर्दत्वापुनर्मूलेनपूर्ववत् ॥६८॥ अर्चयित्वाहरिंध्यात्वाजपेदष्टोत्तरंशतं ॥ पुनर्ध्यायेद्धरिंसर्वदेवदेवेश्वरंप्रभुं ॥ ६९ ॥ जपध्यानहुतार्चादीनेवंयः कुरुतेसदा ॥ धर्मार्थकाममोक्षाणांभाजनंस्यात्सएवहि ॥७०॥ सर्वोत्तमंहरिंज्ञात्वायएवंभक्तिपूर्वकं ॥ जपध्यानादिभिर्नित्यंपूजयेन्नास्यदुर्लभं ॥७१॥ भक्तिंकृत्वान्यदेवेषुब्रह्मरुद्रादिकेष्वपि ॥ सर्वोत्कर्षमविज्ञायविष्णोर्यातितमोध्रुवं ॥७२॥ नयज्ञानचतीर्थानिनोपवासव्रतानिच ॥ दैवतानिचसर्वाणित्रातुंतंशक्नुयुःक्वचित् ॥७३॥ हरिर्हिसर्वदेवानांपरमःपूर्णशक्तिमान् ॥ स्वतंत्रोन्येतद्वशाहिसर्वेतःसजगद्गुरुः ॥७४॥ ब्रह्मादयश्चतद्भक्त्याभागिनोभोगमोक्षयोः ॥ तस्माज्ज्ञेयश्चपूज्यश्चवंद्योध्येयःसदाहरिः ॥७५॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमत्तंत्रसारसंग्रहेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥

हरिःॐ ॥ यस्यकस्यापिमंत्रस्यन्यासःपंचाशदक्षरैः ॥ वीर्यदःकेभितोवक्त्रमक्षिकर्णेषुनासयोः ॥१॥ गंडयोरोष्ठयोर्दंतपङ्क्त्योर्मूर्ध्निचवाचिच ॥ दोःपत्संधिषुसाग्रेषुपार्श्वयोःपृष्ठगुह्ययोः ॥२॥ तुंदेचहृदिधातूनांसप्तके

प्राणजीवयोः ॥ सक्षकारान्न्यसेद्वर्णान्नृसिंहःक्षस्यदेवता ॥३॥ जपेन्यासेचविहितःक्षोक्षराणांसदांततः ॥
प्राणायामोरेचयित्वापूरयित्वाचकुंभके ॥ ४ ॥ तारैस्त्रिर्द्वादशावृत्तैर्द्वयेकद्वादशकेनवा ॥ तत्तन्मंत्रेणवाका
र्योगायत्र्यादशतारकैः ॥५॥ आदावेवजपेकुर्याच्छोषणंदहनंप्लुतिं ॥ वाय्वग्निवारुणैर्बीजैर्ध्यात्वातन्मंडले
हरिं ॥६॥ एकपंचाशद्वर्णानांचतुर्विंशतिमूर्तयः॥ आत्माद्यावासुदेवाद्याविश्वाद्यामत्स्यकच्छपौ ॥७॥ को
लोनृसिंहःसबटुर्जामदग्न्यरघूद्वहौ ॥ वासिष्ठयादवौकृष्णावात्रेयोबुद्धकल्किनौ ॥८॥ शिशुमारश्चेतिशतं
कलाःकलशनामकाः ॥ एताभिःसहितांमूलमूर्तिंकुंभोदकेसुधीः ॥९॥ पूर्वोक्तविधिनाभ्यर्च्यप्रतिमांशिष्य
मेववा ॥ स्नापयेत्पूर्वमर्चायांजपोनूनःसहस्रतः ॥१०॥ मूलमंत्रस्यचांगानांन्यासःस्नानादनंतरं ॥ प्रतिमा
यांसन्निधिकृच्छिष्येमाहात्म्यकृद्भवेत् ॥११॥ कलशःकीर्तिमायुष्यंप्रज्ञांमेधांश्रियंबलं ॥ योग्यतांपापहानिं
चपुण्यवृद्धिंचसाधयेत् ॥१२॥ उपसर्गेषुजातेषुदैवभूतात्महेतुषु ॥ आयुषेवाथशांत्यैवाश्रियेवापुण्यवृद्धये
॥१३॥ योग्यतायैमंत्रसिद्ध्यैविष्णोःप्रीत्यर्थमेववा ॥ जुहुयात्सहस्रमयुतंलक्षंकोटिमथापिवा ॥१४॥ पूर्वव
त्संस्कृतेवह्नौध्यात्वादेवंजनार्दनं ॥ कृत्वात्रिमेखलंकुंडंचतुर्विंशांगुलोच्छ्रितं ॥१५॥ तावत्खातंचतुष्कोणमु

च्छ्रितंद्वादशैववा ॥ द्व्यंगुलंत्र्यंगुलंवापिचतुरंगुलमेववा ॥१६॥ विस्तारोमेखलानांस्यादंत्यावाचतुरंगुला ॥
चतुर्विंशांगुलंवातद्विस्तारोद्वादशैववा ॥१७॥ अश्वत्थपत्राकृतिःस्यान्मूलतोद्वादशांगुला ॥ योनिःखाते
चविनताप्रविष्टाद्व्यंगुलंतथा ॥१८॥ तदात्मनिहरिंध्यात्वाकुंडेदेवींश्रियंतथा ॥ विष्णुवीर्यात्मकंवह्निंनिक्षि
पेत्प्रणवेनतु ॥ १९ ॥ कुर्याच्छ्रियाःषोडशचव्याहृतीभिःपृथक्पृथक् ॥ वह्नेस्तद्वहरेःप्रीतिंकुर्वन्द्रव्यैर्यजेत्ततः
॥ २० ॥ आज्येनवापायसेनसमिद्भिःक्षीरिणामथ ॥ तिलैर्वातंडुलैर्वापिमधुरैस्त्रिभिरेववा ॥ २१ ॥ ब्रह्म
वृक्षसमिद्भिर्वासमिद्भिर्वामृतोद्भवैः ॥ अमृताःसमिधोज्ञेयाःसर्वत्रचतुरंगुलाः ॥ २२ ॥ एवमेवचदीक्षाया
माज्येनैवाहुतिक्रिया ॥ पूजाचकार्याविधिवत्पूर्वंसर्वहुतेष्वपि ॥२३॥ गुरवेदक्षिणांदद्याल्लक्षेलक्षेशतंसुधीः ॥
आत्मनैवकृतेहोमेशक्तितोगुरुदक्षिणा ॥ २४ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमत्तंत्र
सारसंग्रहेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥
हरिःॐ ॥ प्रतिष्ठांकारयन्विष्णोःकुर्यात्सुप्रतिमांबुधः ॥ लोहैर्वाशिलयादार्वामृदावापियथाक्रमं ॥१॥ षण्ण
वत्यंगुलांयोगआसीनामथवास्थितां ॥ शयानांवामुमुक्षूणांव्याचक्षाणांनिजांस्थितिं ॥२॥ मुखादूर्ध्वंद्व्यंगु

लोचांनवांगुललसन्मुखां ॥ सुवृत्तत्र्यंगुलग्रीवामास्तनाचषडंगुलां ॥३॥ पंचादशांगुलांनाभेरासार्धदशकां
गुलां ॥ वृषणादामूलतश्चसार्धद्व्यंगुलमायतां ॥४॥ तावदागुदतोदीर्घांचैत्यादष्टादशांगुलां ॥ तथाद्व्यंगुल
चैत्यांचद्वाविंशज्जंघयायुतां ॥५॥ आरभ्यगुल्फमध्यंचसहार्धचतुरंगुलां ॥ षडंगुलोच्चप्रपदांसार्धत्र्यंगुलमेव
च ॥६॥ प्रपदोच्चयुतामंतेद्व्यंगुलप्रपदोच्छ्रयां ॥ त्र्यंगुलद्व्यंगुलामर्धहीनमध्यांगुलामपि ॥७॥ त्रिपदांगुल
हीनान्यांततस्तादृशतत्परां ॥ पादोनोच्चांगुष्ठनखांतदर्धतदनंतरां ॥८॥ क्रमशःपादहीनान्यांरक्तपादनखां
शुभां ॥ विस्तारःप्रपदस्यापिषडंगुलउदाहृतः ॥९॥ अंगुष्ठपरिणाहस्तुचतुरंगुलईरितः ॥ त्र्यंगुलस्तुतदन्य
स्यत्रीह्यर्धोनाःक्रमात्पराः ॥१०॥ दशांगुलंजंघमूलंमध्यंचत्र्यंगुलाधिकं ॥ सप्तादशांगुलंतूर्ध्वंजानुरष्टादशां
गुलः ॥११॥ ऊर्वतोपितथाज्ञेयोमध्यंद्विद्वादशांगुलं ॥ चतुरंगुलाधिकंमूलंगुह्यंसार्धचतुष्टयं ॥१२॥ सार्धत्रयं
परीणाहाद्वृषणंचतुरंगुलं ॥ सप्तांगुलंपरीणाहाद्वृत्तंप्रोक्तंसमस्तशः ॥१३॥ अष्टत्रिंशांगुलःकट्याःपरीणाहउ
दाहृतः॥ सुवृत्तत्वंतथाश्रोण्योःपीनत्वंचसमस्तशः॥१४॥ विस्तारश्चतथाकट्याःसुप्रतिष्ठिततापदोः ॥ कट्या
श्चैवांगुलाधिक्यंनाभेरधउदाहृतः ॥१५॥ नाभिःसार्धांगुलश्चैवगंभीरोर्धांगुलोन्नतः ॥ वृत्तःप्रदक्षिणश्चैवद्वि

चत्वारिंशदंगुलं ॥१६॥ मध्यंस्तनेपरीणाहःषडंगुलमतोधिकः॥ एकोनविंशांगुलंतदुरोविस्तारलक्षणं॥१७॥
पादोनमंगुलंचैवभुजाभ्यांसहसार्धकं॥ अंसयोर्विस्तृतिश्चैवपृथगष्टांगुलामता॥ १८ ॥ सप्तांगुलोच्छ्रयःकक्षा
दुपरिस्कंधयोर्मतः॥ अष्टत्रिंशांगुलंचैवहस्तयोर्मानमुच्यते ॥१९॥ अष्टादशांगुलोबाह्वोःपरीणाहउदाहृतः ॥
क्रमादूनंतदंतेतुसार्धाष्टांगुलमीरितं ॥२०॥ सांगुलस्तुतलःसार्धनवांगुलउदाहृतः॥ समंतदुभयंज्ञेयंतथैवतल
विस्तृतिः ॥२१॥ अर्धांगुलोन्नतामध्याद्वयोःसार्धांगुलोन्नता॥ कनिष्ठिकायास्तस्यास्तुव्रीहिमात्राधिकःपरः
॥२२॥ सार्धत्रयपरीणाहौमध्यज्येष्ठावुदाहृतौ॥ अन्यौव्रीहितदर्धोनावन्यासार्धद्वयांगुला ॥२३॥ पादोनांत
परीणाहाःसर्वाज्येष्ठांविनास्मृताः॥ वक्षोविस्तारसदृशःपरीणाहोगलस्यच ॥२४॥ ललाटकुक्षिकंठास्तुदीर्घ
रेखात्रयान्विताः॥ वृत्तोगलोबाहवश्चस्तनावंगुलयस्तथा ॥२५॥ रक्तास्तलनखाश्चैवनेत्रांतोधरएवच॥ उत्त
रोष्ठश्चजिह्वाचनखौपादोनकांगुलौ ॥२६॥ अर्धांगुलौतथामध्यावन्येऽष्टांशक्रमोनकाः॥ नासिकायाअधस्ता
च्चनासिकाचरराटिका ॥२७॥ समामानेननासायाउच्चत्वेनैवमापने ॥ अर्धांगुलाधिकंसर्वमुखस्यतुभविष्य
ति ॥२८॥ चतुरंगुलंतथैवास्यंसार्धव्रीह्यधरंस्मृतं॥ उत्तरंव्रीहिमात्रंतुतदूर्ध्वंचाधरोपमं॥ २९॥ सार्धांगुलम

थप्रोक्तमधरादधएवच ॥ आस्यपार्श्वद्वयंप्रोक्तमाकर्णात्तुषडंगुलं ॥३०॥ सप्तांगुलंनासिकायाःपार्श्वमाकर्णतः
स्मृतं ॥ सपादांगुलमुच्चाचनासिकापरिकीर्तिता ॥ ३१ ॥ अर्धांगुलेपुटेतस्यामध्यंचसमुदाहृतं ॥ नासिकात्री
हिविस्ताराचक्षुषीचांगुलित्रये ॥३२॥ अंगुलंचैवविस्तीर्णेफुल्लेऽर्धंचतदन्यथा ॥ चतुरंगुलौभ्रुवौचैवतथार्धांगु
लविस्तृतौ ॥३३॥ असंहतौचनिबिडौतथापक्ष्मसुनीलकं ॥ कर्णौचत्र्यंगुलौसार्धद्वयविस्तारसयुतौ ॥३४॥
सकुंडलंतावदेवविवरंसंप्रकीर्तितं ॥ तथाद्व्यंगुलविस्तारंलताभ्यांसहकथ्यते ॥ ३५ ॥ कर्णपूरयुतौकर्णावुत्प
लाभ्यांचसंयुतौ ॥ नीलालकसहस्रेणयुक्तंतन्मुखपंकजं ॥३६॥ ललाटंसुविशालंचतथासार्धनवांगुलं॥ विस्ता
रोमूर्ध्निवृत्तंचशिरश्छत्राकृतिस्मृतं ॥३७॥ दीर्घाश्चकुंचिताग्राश्चनीलाःकेशाहरेर्मताः ॥ मुखमानेनचैवोच्चं
किरीटंकेशवस्यहि ॥३८॥ कुंडलेमकराकारेवक्षश्चैवसकौस्तुभं ॥ सश्रीवत्संदक्षिणतःपीनंतुंगमुदाहृतं॥३९॥
हारग्रैवेयसहितमुपवीतयुतंतथा ॥ बाहवश्चसकेयूरकंकणांगदमुद्रिकाः॥४०॥ समध्यबंधंमध्यंचनितंबेपीत
मंबरं ॥ कांचीगुणश्चपदयोर्नूपुरेचातिसुस्वने ॥४१॥ अंगुलीयानिचपदोःकृतिभिःसाधुकारयेत् ॥ सोत्तरीयं
चचक्राद्यैरायुधैश्चसमन्वितं ॥ ४२ ॥ अनुन्नतैरविरलैर्दंतैर्युक्तंचसुस्मितं ॥ समदृष्टियुतंकार्यंश्लक्ष्णंचैवम

नोहरं ॥४३॥ प्रतिमार्थंव्रजन्पंचध्वनिभिर्मंगलैर्युतः ॥ गत्वाशुचिस्थलंचैवशिलांतत्रपरीक्षयेत् ॥ ४४ ॥ ध्वनिभेदेनविज्ञायशिलांगर्भवतींत्यजेत् ॥ मूलमंत्रंजपन्विष्णुंध्यायंस्तिष्ठेदुपोषितः ॥ ४५ ॥ वार्क्षीचेद्यज्ञवृक्षस्यसारेणैवतुकारयेत् ॥ बलिदानंचसंक्षेपविधानेनैवकथ्यते ॥४६॥ अस्यसंक्षेपशास्त्रत्वान्नविस्तरविरोधिता ॥ दत्वोपहारंहरयेतद्भूतेभ्योबलिंहरेत् ॥४७॥ प्राच्येभ्योविष्णुभूतेभ्यइत्याद्यखिलदिक्षुच ॥ आदाय विष्णुभूतेभ्योलोकपेभ्यस्तथाहरेः ॥४८॥ अनुज्ञामुद्धरेद्वृक्षंशिलांचप्रतिमाकृते ॥ प्रतिमांपिंडिकांपीठंशिलाभिस्तुत्रिजातिभिः ॥४९॥ स्वरस्थूलत्वभेदेनपुंस्याद्याजातितःशिलाः ॥ पुंशिलाप्रतिमार्थंतुस्त्रीशिलापीठकृत्तये ॥५०॥ वेदमंगलघोषेणवाद्यैश्चप्रतिमांहरेत् ॥ प्रागुदक्प्रवणेदेशेकुर्याद्देवालयंसुधीः ॥५१॥ रामावृतेदक्षिणतःपश्चाद्वियंग्रएववा ॥ मध्येवाग्रामपुरयोर्विशालेसुशुचौतथा ॥५२॥ ऐशानींदिशमेकांतुविनोदकविवर्जिते ॥ जलाशयस्यमध्येवाशिलावृक्षादिवर्जिते ॥५३॥ श्मशानादिकदेशानांविदूरेसुमनोहरे ॥ किष्कुद्वादशतोनूनंकुर्याद्देवालयस्थलं ॥५४॥ द्विगुणंचतुर्गुणंवापिशतकिष्कुप्रमाणकं ॥ कृत्वाभूशोधनं सम्यक्सार्धपुंमानतस्त्वधः ॥५५॥ केशांगारास्थिवल्मीकलोष्ठाश्मादिविवर्जिते ॥ हरिंतत्रापिसंपूज्यबलिं

दत्वापिपूर्ववत् ॥५६॥ मृद्दारुशैलैर्लोहैर्वाकुर्याद्देवालयंदृढं ॥ दी(र्घास्तुक)र्घस्थकलमास्तिस्रस्तिर्यगष्टयवोद
राः ॥५७॥ अंगुल्यामध्यरेखायाःसमालक्षणतःस्मृताः॥ स्वांगुल्यामध्यरेखातुप्रतिमादिषुलक्षणं॥५८॥ह्रस्व
मध्योच्चभेदेनतत्तन्मानंसमस्तशः ॥ प्रादेशहस्तपुरुषमानंसामान्यलक्षणं ॥५९॥ प्रतिमाध्यर्धकंद्वारमूर्ध्वम
र्धंचविस्तृतिः॥ प्रतिमार्धप्रमाणेनपीठस्योच्चत्वमिष्यते ॥६०॥ उन्नतिःपिंडिकायास्तुचतुरंगुलमानतः॥ त्र्यं
गुलंद्व्यंगुलंवापिगृहांतःप्रतिमासमं ॥६१॥ उच्चंपर्यक्चक्रमशउच्चत्वंमध्यतःस्मृतं ॥ तावदुच्चंबहिश्चैवयद्येकंशि
खरंभवेत् ॥६२॥ अर्धोच्चमथवापिस्यादधस्तात्प्रतिमोन्नतं ॥ ततोद्विगुणमानंवासार्धप्रतिममेववा ॥६३॥
शिखरांतरेतुप्रतिमामानंतद्गलउच्यते ॥ तत्त्रिपादंतदर्धंवातदध्यर्धमथापिवा ॥६४॥ वर्तुलंपद्मसदृशंहस्ति
पृष्ठसमंतथा ॥ चतुरस्रंचाष्टकोणंविमानंपरिकीर्तितं ॥६५॥ प्रतिमायादशगुणंविंशद्गुणमथापिवा ॥ वर्तु
लंशिखरंत्वेकंकिरीटाकृतिमद्भवेत् ॥६६॥ सभयापिसमेतंवापृथक्सभमथापिवा ॥ द्विसभंत्रिसभंवापिसगो
पुरमथापिवा ॥६७॥ प्राकारवृत्तयुक्तंवासप्तप्राकारमेववा ॥ समवृत्तंकिष्कुमात्रंबहिर्वाचतुरश्रकं ॥ ६८ ॥
ततःपरंकिष्कुमात्रंसभायाअंतरंयदि ॥ ततस्तावत्तृतीयायाःसार्धमेवह्युदाहृतं ॥६९॥ किष्कुत्रयंचशक्रादेः

स्थानंतद्वृत्ततःस्मृतं ॥ ततस्तुमंटपंकुर्यात्प्रतिष्ठायाःसुलक्षणं ॥७०॥ पूजयेद्वास्तुपुरुषस्योपरिष्ठांस्तुसर्वदा॥
देवान्ब्रह्मादिकान्वास्तुर्वराहस्यहरेःसुतः॥७१॥ पातितोदैवतैर्भूमौचतुरश्राकृतिःस्थितः ॥ कृत्वाष्टकाष्ठको
ष्ठानिमध्येब्रह्माचतुष्टये ॥७२॥ पूज्योद्वयेद्वयेशक्रोयमोवरुणएवच ॥ सोमश्चपूज्यःकोणेषुवह्न्याद्याःकोण
देवताः ॥७३॥ पुनस्त्रयस्त्रयेकामंधातारंसविधातृकं ॥ स्कंदंचपूजयेत्कोणेसूर्यंचैवविनायकं ॥७४॥ कालं
कुबेरंचबहिःप्रत्येकंदिक्षुपूजयेत् ॥ हारंहरिंगभीरंचगाहनंगेहनंगुहं ॥७५॥भातमंगारकंचैवपूर्वस्यांदिशि
पूजयेत् ॥ दारुणंविदरिंदूतंप्रद्योतंद्योतनंदरिं ॥७६॥ मृत्युंशनैश्चरंचैवदक्षिणस्यांप्रपूजयेत् ॥ पुष्करंक्षर
णंक्षारंविक्षणंक्षोभणंक्षरं ॥७७॥ चार्वंगंभार्गवंचैवपश्चिमायांप्रपूजयेत् ॥ चारंविचारंप्रचरंसंचारंचरणंचरं
॥७८॥ बृहस्पतिंबुधंचैवाप्युत्तरस्यांप्रपूजयेत् ॥ एवमेवविमानस्यकृतेःप्रागपिपूजयेत् ॥७९॥ सप्तपर्णमयंसा
धुकारयेन्मंटपंततः॥ सप्तहस्तंद्विषड्ढस्तमथवाद्विगुणंततः॥८०॥ चतुर्गुणंवासम्यक्चतुरश्रंसहाजिरं ॥ अ
न्यंचमंटपंदीर्घपंचहस्तंतुकारयेत्॥८१॥ त्रिचतुष्कोष्ठकंतत्रमध्येप्रागायतंशुभं ॥ कारयेन्मंडलंसाधुहस्तमात्रं
तुविस्तृतं ॥८२॥तत्रद्वादशपात्राणिस्थापयेत्पालिकादिकं ॥ पालिकास्तुचतुर्विंशत्यंगुलोच्छ्रयसंयुताः॥८३॥

अष्टादशांगुलाश्चैवतथापंचमुखाइति॥द्वादशागुलकाश्चैवशरावाःपश्चिमानुगाः॥८४॥तत्रविष्णुंचतुर्मूर्तिंपूजयेद्भक्तितस्त्रिशः॥ सप्तधान्यानितेष्वेवपूरयेदंकुरार्थतः॥८५॥ तत्रनित्यंबलिंदद्याद्विष्णवेदशरात्रकं॥ब्रह्मशंकरगीर्वाणपितृगंधर्वयक्षकैः॥८६॥ भूतैश्चपायसेनैवतथापद्माक्षतेनवा॥ अन्नापूपेनपुष्पान्नैरन्नलाजाक्षतैरपि॥८७॥ सक्तुभिश्चक्रमेणैवदेवांतान्पायसेनवा॥ तदैवप्रतिमायाश्चकारयेदधिवासनं॥८८॥ पंचगव्येसप्तरात्रंक्षिप्त्वापुरुषसूक्ततः॥ वेदांश्चचतुरःसम्यक्पारयेयुर्द्विजोत्तमाः॥८९॥ प्राच्यादिद्वारगौद्वौद्वावेकैकंतुदशावराः॥ यथालब्धंयथावित्तमथवाविष्णुतत्पराः॥९०॥ त्रयोदशात्रकुंडानिपरितःकारयेद्बुधः॥उक्तलक्षणयुक्तानिप्रधानंत्वग्निकोणके॥९१॥ साक्षात्तुकोणगाद्धस्तमात्रमंतरतःसुधीः॥ आज्याहुतितेषुकुर्यात्प्रत्येकंलक्षसंख्यकं॥९२॥ प्रत्येकमयुतंवापिप्रधानेलक्षसंख्यकं॥ अर्धंतदर्धमथवामूलमंत्रेणमंत्रवित्॥९३॥ पंचविंशतितत्वार्थेप्रधानेजुहुयात्पुनः॥ प्रत्येकंतुसहस्रंवाप्रत्येकंशतमेववा॥९४॥शतंपुरुषसूक्तेनगायत्र्याचसहस्रकं॥ कृत्वाजलाधिवासंचपूर्वंवापंचगव्यतः॥९५॥ चक्राब्जंभद्रकंवापिमंटपेमंडलंशुभं॥ पद्मंवृत्तत्रयंचक्रंराशयोवीथिकालताः॥९६॥ शोभोपशोभिकाश्चापिचक्राब्जस्यतुलक्षणं॥ चतुरश्रंविनाचक्रंविशेषोभद्रकेस्मृतः

॥९७॥ सहस्रमर्धपादंवाकलशांस्तत्रपूजयेत् ॥ शतंतदर्धपादंवावित्ताभावेनिगद्यते ॥९८॥क्वाथेनक्षीरिवृक्षा
णांतथापंचामृतैरपि ॥ पंचगव्येनशुद्धेनजलेनचपृथक्पृथक् ॥९९॥ पूरयेत्कलशान्मध्यंशुद्धोदेनैवपूरयेत्॥
ब्राह्मस्यैवचतुर्दिक्षुगंधोदानांचतुष्टयं॥१००॥चतुर्दलेसितेपद्मचतुष्केमंडलेस्थिते॥पूर्वादिक्रमयोगेनरसक्वाथ
शुभोदकान् ॥१०१॥ गंधांश्चस्थापयेत्पंचगव्यंशुद्धांतरेन्यसेत्॥पृथक्चतुर्दलंपद्मंरक्तंकृत्वाल्पकंसुधीः॥१०२॥
पंचाशत्त्वेतुगंधोदंसर्वमध्येनिधापयेत् ॥ ब्राह्मस्यपुरतस्त्वेकंशार्वंसंस्थापयेद्बृहत् ॥१०३॥ अष्टदिक्ष्वष्टपद्मेषुपं
चकंपंचकंन्यसेत् ॥ अनेनक्रमयोगेनकलशाअखिलाअपि ॥ १०४ ॥ तत्तद्द्रव्यमयास्तत्रतत्रस्थाप्यास्तुबाह्य
तः ॥ तदैवांकुरपात्राणिपरितस्तत्रविन्यसेत् ॥१०५॥ कुशोदकंचकार्पूरंकौंकुमंचांदनंतथा ॥ तुहिनोदं(हे
रबेर)हरिद्रोदमौशीरंकौष्टसार्षपं ॥ १०६ ॥ नदीसंगमजंचैवताटाकंकौप्यमेवच ॥ निर्झरोदमितिप्रोक्तावि
शेषकलशाइमे॥१०७॥शुद्धोदद्वयमप्येतन्महातीर्थसमुद्भवं॥चतुर्विंशतिमूर्तीनांवर्णमूर्तीस्तथापराः॥१०८॥
आवाहयेच्छतत्वेतुक्रमव्युत्क्रमतस्तुताः ॥ वर्णमूर्तीःपुनश्चैवद्विचतुर्वारमेववा ॥१०९॥ सहस्रकलशादित्वे
जपेन्मंत्रांश्चशक्तितः ॥ ततस्तुपंचघोषैश्चवेदघोषैस्तथादरात् ॥ ११० ॥ आनीयप्रतिमांस्नानंकारयेत्प्रणवे

नतु ॥ मंत्रैःपुरुषसूक्तांतैर्विश्वतश्चक्षुषातथा ॥१११॥ पुनश्चाष्टाक्षरेणैवप्रणवेनैवभक्तितः ॥ स्नापयित्वागं
धजलैर्गंधपुष्पादिभिःपुनः ॥ ११२ ॥ अलंकृत्यस्थापयेत्तुप्रतिमांप्रणवेनतु ॥ जपेदष्टाक्षरंमंत्रंतत्तन्मूर्तिमनुं
तथा ॥११३॥ अष्टोत्तरशतंमंत्रीध्यायेत्तेजोमयींपुनः ॥ प्रतिमांप्रतिमांतस्थांतन्मध्येपरमंवपुः ॥ ११४ ॥
चिदानंदरसंसर्वगुणसंपूर्णमुत्तमं ॥ पंचविंशतितत्त्वानांदेवतास्तदनंतरं ॥ ११५ ॥ स्थापयेत्प्रतिमामध्येप
रितःकेशवस्यतु ॥ तत्रात्वाहार्षसूक्तंचघर्मसूक्तंचवैष्णवं ॥ ११६ ॥ सूक्तंचविश्वकर्मीयंपौरुषंसूक्तमेवच ॥
जप्त्वाचैवनिजंमंत्रंपुनरष्टाक्षरंसुधीः ॥ ११७ ॥ प्रणवंचजपेद्विष्णुंध्यायन्नुत्तमरूपिणं ॥ ततस्तुकलशैर्बाह्य
क्रमेणैवजनार्दनं ॥ ११८ ॥ स्नापयेदुक्तमंत्रैस्तुमध्यमंप्रणवेनतु ॥ अष्टार्णेननिजेनापितथापुरुषसूक्ततः
॥११९॥ आवाहनंचस्नपनंपंचगव्येनमध्यवत् ॥ पूर्वाद्युत्तरपर्यंतःकलशक्रमउच्यते ॥ १२० ॥ जप्त्वापुनश्च
तन्मंत्रान्पूजयेच्चविधानतः ॥ द्वारलोकपतिभ्यश्चबलिंदत्वायथाक्रमं ॥१२१॥ वस्त्ररत्नहिरण्याद्यैरलंकृत्य
विभूतितः ॥ गुरवेदक्षिणांदद्यात्कोटिलक्षंसहस्रकं ॥ १२२ ॥ शतमर्धंतदर्धंवानिःस्वोभक्त्याक्षमापयेत् ॥
तदर्धमृत्विजांचैवतदर्धंपारणाकृतां ॥१२३॥ आश्वभ्यआश्वपाकेभ्योदद्यादन्नंसमस्तशः ॥ पुरस्तात्परतश्चै

वसप्तरात्रंनिरंतरं ॥१२४॥ सुवर्णवस्त्ररत्नाद्यैरागताभ्यागतानपि ॥ पूजयेच्छक्तितोभक्त्याप्रीयतांभगवा
निति ॥१२५॥ गीतनृत्तैश्चवाद्यैश्चपुराणैरितिहासकैः॥ सूक्तैर्मंगलघोषैश्चवैदिकैर्दिनसप्तकं ॥१२६॥ नयेत्त
तोमहाराजविभूत्यावभृथंसुधीः ॥ कारयेद्देवदेवस्यस्वाध्यायैर्गीतनृत्तकैः ॥ १२७ ॥ महानदीसंगमेतुतीर्थे
चातिप्रशस्तके ॥ स्नापयेत्पूर्ववन्मंत्रैःपुंसूक्तांतैःस्मरन्हरिं ॥१२८॥ ततःपूर्ववदागत्यप्रवेश्यपुरुषोत्तमं ॥ पू
जयित्वाविधानेनदत्वादानानिशक्तितः ॥१२९॥ गुरुंचभक्त्यासंपूज्यस्वीकुर्यादाशिषस्ततः ॥ शतप्रस्थाद
नूनंतुनैवेद्यंपायसोत्तरं ॥ १३० ॥ दिनेष्वेतेषुदातव्यंसघृतंससितादिकं ॥ पश्चादपियथाशक्तिपूजाकार्या
हरेःसदा ॥ १३१ ॥ जीर्णालयोद्धृतौचैवतत्त्वमंत्रान्स्वकंतथा ॥ प्रातिलोम्येनजप्त्वैवमूर्तौसंकोचयेद्धरिं
॥१३२॥ उक्तेनैवविधानेनतदर्थैर्विभवैःसुधीः ॥ पादमात्रैरपिहरिंस्नापयित्वायथोदितं ॥ १३३ ॥ एतेनैव
विधानेनकृत्वादेवालयंपुनः ॥ स्थापयेत्पुंडरीकाक्षंद्विगुणेनप्रवाहणात् ॥ १३४ ॥ विभवेनानुलोम्येनज
पन्मंत्रान्पुनस्तथा ॥ आराधयेज्जगन्नाथंध्यायन्भक्त्यायथोदितं ॥ १३५ ॥ यात्रापिपूर्ववत्तत्राप्युत्सवेषुच
सर्वशः ॥ कलशोक्तविधानेनपूजाबलिहृतिस्तथा ॥ १३६ ॥ उत्सवेषुसदाकार्याकलशश्चोत्सवादनु ॥

यात्रास्नानंचकर्तव्यंसम्यगुक्तविधानतः ॥ १३७ ॥ चोरचांडालपतितश्वोदक्यादिप्रेवशने ॥ शवाद्युपहतौचैवपूजाविच्छेदनेतथा ॥ १३८॥ स्नापनोक्तेनमार्गेणप्रायश्चित्तकृतिःस्मृता ॥ सर्वत्रविष्णुगायत्र्याहोमःस्यादयुतावरः॥१३९॥ नावाव्याद्यभिधानानुविद्महेधीमहेतथा ॥ प्रचोदयात्तृतीयाधस्तन्नोगायत्रिनामिका ॥१४०॥ दुर्गाशिवस्कंदसूर्यविनायकमुखानपि ॥ स्थापयेदुक्तमार्गेणतत्तन्मंत्रैःस्मरन्हरिं ॥१४१॥ गोलकद्वितयंविष्णोस्त्रितयंवाप्रकीर्तितं ॥ अन्यदेवप्रतिष्ठासुतदंतश्चितयेद्धरिं ॥१४२॥ विष्णुस्मृतिविहीनातुपूजास्यादासुरीसदा ॥ गृह्णंतिदेवतानैतांततःस्याद्देशविप्लवः ॥ १४३ ॥ व्याधिचोरादिभिस्तस्मादंतर्ध्येयोहरिःसदा ॥ विष्णुभक्तिविहीनस्यगतिःस्यान्नशुभाक्वचित् ॥ १४४ ॥ भक्तस्याप्यन्यदेवेषुतस्माद्ध्येयोहरिःसदा ॥ संस्मृतोभगवान्विष्णुःसर्वमंगलमंगलः ॥१४५॥ समस्ताभीष्टदायीस्यात्तेनध्येयोखिलैर्जनैः ॥ पुरुषोव्यक्तंचमहानहंकारोमनस्तथा ॥१४६॥ दशेंद्रियाणिशब्दाद्याभूतेताःपंचविंशतिः ॥ तत्त्वाख्याकालमायेचनियतिर्मतिरेवच ॥ १४७ ॥ विद्याकलाप्रवृत्तिश्चद्वात्रिंशत्तत्त्वसंग्रहः ॥ स्फूर्तिःसंवित्प्रतिष्ठाचशक्तिरित्यपराणितु ॥१४८॥ महालक्ष्मीस्वरूपाणिह्येकादशविदोविदुः ॥ विष्णोरपिस्वरूपाणितन्नाम्नैकादशैवतु

॥१४९॥ प्रधानोपमवर्णानिद्विभुजान्यप्यशेषतः ॥ कृतांजलिपुटान्येवप्रधानंतंहरिंप्रति ॥१५०॥ सर्वाण्ये तानितत्त्वानिब्रह्मातुपुरुषःस्मृतः ॥ महांश्चाव्यक्तनाम्नीतुब्रह्माणीसंप्रकीर्तिता ॥ १५१ ॥ एवंवायुरपिज्ञेयो भारतीचैवतत्त्रयं ॥ रुद्रोहंकारउद्दिष्टःस्कंदेंद्रौमनउच्यते ॥१५२॥ अहंकारःशेषवींद्रावपिविद्वद्भिरीरितौ ॥ दिग्वायुसूनुसूर्याश्चवरुणश्चाश्विनावपि ॥१५३॥ वह्निदक्षाविंद्रसूनुर्मित्रश्चैवमनुस्तथा ॥ इंद्रियाख्याःशब्द नामाबृहस्पतिरुदाहृतः ॥१५४॥ अन्येतुसूनवोवायोरुद्रस्यापिप्रकीर्तिताः ॥ एतेषुभगवान्विष्णुःप्रधानत नुरेवतु ॥१५५॥ ध्येयःपरात्मनोर्मध्येतत्त्वनामातदर्थयोः॥ जपेन्यासेनमोंतश्चस्वाहांतोहोमकर्मणि॥१५६॥ त्रिचतुष्षट्दशावृत्तिरेतेषांतुहुतादिके ॥ न्यासोंगुलीषूरुबाहुमध्येषुव्युत्क्रमेस्मृतः ॥१५७॥ क्रमेविपर्ययेणा त्रशक्त्यादित्वंप्रकीर्तितं ॥ ऋषिच्छंदोदेवतांगध्यानानुक्तौप्रधानवत् ॥१५८॥ ज्ञेयामंत्राःसमस्तास्तेपृथङ्मो क्षादिदायकाः ॥ तंत्रमार्गास्तुहरिणाह्यसंख्याःकीर्तिताअपि ॥१५९॥ तेष्वयंसुगमोमार्गःसफलश्चानुतिष्ठ तां ॥ यावतोह्यननुष्ठानेकर्मपूर्तिर्नविद्यते ॥१६०॥ तावत्समस्तंकथितमस्मिंस्तंत्रेयथाविधि ॥ प्रीयतेनेन मार्गेणपूजितोमुक्तिदोभवेत् ॥१६१॥ कामदश्चस्वभक्तानांभगवान्पुरुषोत्तमः ॥१६२॥ इतिश्रीमदानंदती

र्थभगवत्पादाचार्यविरचितेश्रीमत्तंत्रसारसंग्रहेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥

॥ ॐ ॥ अथविष्णूदितेतंत्रसारेमंत्रगणोहियः ॥ उदितःसंग्रहेणासावुच्यतेखिलसाधकः ॥१॥ याष्टमस्तू युतोंतेनसमेतश्चैवभूभृतः ॥ बीजंनमश्चभगवान्सोद्देशोरूपसंयुतः ॥२॥ सएवतादृशोलोकत्रयपालोभुवः पतेः ॥ भावंमेदेहिदांतेतुदापयस्वाहयायुतः ॥३॥ मनुस्तस्यापरस्तारबीजोद्देशनमोयुतः ॥ नमःसोद्देशभ गवान्महाशब्दयुतश्चसः ॥ तादृशःस्वाहयायुक्तोवराहस्यापरोमनुः ॥४॥ श्यामःसुदर्शनदराभयसद्धरेतो भूम्यायुतोखिलनिजोक्तपरिग्रहैश्च ॥ ध्येयोनिजैश्चतनुभिःसकलैरुपेतःकोलोहरिःसकलवांछितसिद्धयेजः ॥५॥ वैष्णवानांमुनिर्ब्रह्मामंत्राणांवर्णभेदतः ॥ ज्ञेयंछंदोदेवतैकंतत्तद्रूपोहरिःपरः ॥६॥ प्रणवेनस्वनाम्नाच भूधरेणपरात्मना ॥ सर्वज्ञसर्वशक्तिभ्यांषडंगानिविदोविदुः ॥७॥ ज्ञानैश्वर्यप्रभानंदतेजःशक्तिभिरेववा ॥ पूर्णात्ममध्यगैःसर्ववैष्णवांगान्यथोविदुः ॥८॥ तिष्ठोदादिस्वजायायाःकारणंस्वाहयायुतः ॥९॥ श्रीकरोष्टा क्षरोमंत्रोगरुडारूढसंस्मृतिः ॥ द्विर्भीषयत्रासयचप्रमर्दयतथैवच ॥१०॥ प्रध्वंसयाथोरक्षेतिपंचांगश्चेदुदा हृतः॥ क्रूरंवीरंबृहद्विष्णुंदीप्यंतंविश्वतोमुखं ॥११॥ पुंमृगेंद्रंभयकरंशुभंभृत्योश्चमारकं ॥ नमामिस्वयमित्ये

षट्त्रिंशार्णोमनुर्हरेः ॥१२॥ द्विर्जयस्योपरिनिजंसोद्देशंसर्ववित्तथा ॥ महातेजोबलंवीर्यंतादृशंस्वाहयायुतं ॥१३॥ चतुर्विंशाक्षरोमंत्रोनिखिलेष्टप्रदायकः ॥ विघ्नहेधीमहेपूर्वंस्वयंचैवमहाबलः ॥ १४ ॥ प्रेरयेत्तन्न इत्येतन्मध्येनंतःप्रकीर्तितः ॥ पादैर्व्यस्तैःसमस्तैश्चपदैश्चांगंप्रकीर्तितं ॥१५॥ पूर्वयोस्तत्रपूर्वंतुसर्वज्ञेनषडंगकं ॥ तृतीयंतुद्विरावृत्तैःपादैरंगसमन्वितं ॥ १६ ॥ ध्यायेन्नृसिंहमुरुवृत्तरवित्रिनेत्रंजानुप्रसक्तकरयुग्ममथापराभ्यां ॥ चक्रंदरंचदधतंप्रिययासमेतंतिग्मांशुकोट्यधिकतेजसमग्र्यशक्तिं ॥१७॥ सर्वेष्वपिहिमंत्रेषुद्याद्यनंतांतबाहुकः॥ चेतनांतस्थमारभ्यसर्वगांतस्थ(स्व)रूपवान् ॥१८॥ अनंतरूपोध्येयोत्रस्वगुरूक्तानुसारतः॥ यथायोग्यंयथाशक्तितत्तदायुधभूषणः॥१९॥ शंखचक्रगदापद्मखड्गखेटाःसशार्ङ्गकाः॥शरोमुसलवज्रौचहलःपाशांकुशौतथा ॥२०॥ शूलंचभिंडिबालश्चपट्टिशोग्निर्वराभये ॥ तर्कमुद्राक्षमालाचपुस्तकंचविदारणं ॥२१॥ इत्यादीन्यखिलान्येवविष्णोश्चित्यानिबाहुषु ॥ वियत्सइतियुग्मार्णोविपरीतश्चसस्मृतः॥२२॥ ससर्गहीनोवेतश्चबिंदुहीनोत्तरस्तथा ॥ त्रयएतेमहामंत्राःपुरुषार्थचतुष्टये ॥२३॥ कल्पवृक्षाःप्रियाविष्णोर्विशेषज्ञानदायकाः ॥ तैरेवतुद्विरावृत्तैरंगमेषांप्रकीर्तितं ॥२४॥ श्वासरूपोजपोनित्यमुभयोर्विद्वदज्ञयोः ॥ ए

कविंशत्सहस्रात्मासषट्शतमहर्निशं ॥ २५ ॥ अर्पणीयोहरौनित्यंप्रातर्योगोमहानयं ॥ अशेषदोषदहनस्त
त्त्वज्ञानप्रदायकः ॥ २६ ॥ अष्टैश्वर्यप्रदश्चैवकृतादौसमुपासतां ॥ तारयोगोप्येवमेवब्रह्मादावेववर्तते ॥ २७ ॥
ध्यायेद्रवींदुकरमिंदुसहस्रलक्षकांतिंप्रियासहितमास्थितमिंदुबिंबे ॥ शंखारिदोर्द्वयमुदर्कमहेंदुबिंबात्संसिच्य
मानममृतेनरमाधिनाथं ॥ २८ ॥ अंत्यस्यरक्तवर्णोवाध्येयोविष्णुःसनातनः ॥ विद्युद्वर्णोथवाध्येयःशक्त्येतःपंच
मंत्रयुक् ॥ २९ ॥ अष्टाक्षरोमहामंत्रस्तैरेवांगैःसमन्वितः ॥ अंत्यध्यानयुतश्चैवनिःशेषपुरुषार्थदः ॥ ३० ॥ मू
लंनःप्रतिषेधश्चसोद्देशोभगवानपि ॥ विष्णुर्भोज्याधिपःस्वाहायुक्तोष्टादशवर्णकः ॥ ३१ ॥ अंगानितत्पदैरे
वमंत्रचिंतामणिस्वयं ॥ यथेष्टभक्षभोज्यादिदातामुक्तिप्रदायकः ॥ ३२ ॥ ध्यायेत्सुशुक्लमरविंददलायताक्षंसौव
र्णपात्रदधिभोज्यमथामृतंच ॥ दोर्भ्यांदधानमखिलैश्चसुरैःसमेतंशीतांशुमंडलगतंरमयासमेतं ॥ ३३ ॥ अमृ
तंस्वयमुद्देशयुक्तःसहृदयोमनुः ॥ सतारोष्टाक्षरोंगानिपदैर्व्यस्तैःसमस्तकैः ॥ ३४ ॥ उद्यद्रविप्रभमरींद्रदरौग
दांचज्ञानंचबिभ्रतमजंप्रिययासमेतं ॥ विश्वावकाशमभितःप्रतिभासयंतंभासास्वयास्मरतविष्णुमजादिवंद्यं
॥ ३५ ॥ त्रिविक्रमस्तुसोद्देशोविश्वरूपश्चतत्परः ॥ धीविदौचमहेविष्णुस्तन्नःप्रेरणमध्यगः ॥ ३६ ॥ स्वयमु

द्देशसंयुक्तस्तदाद्यर्णपुरःसरः ॥ सनतिःषडक्षरोमंत्रोवर्णैरंगक्रियामता ॥ ३७ ॥ अंगारवर्णमभितोंडबहिःप्र
भाभिर्व्याप्तंपरश्वधधनुर्धरमेकवीरं ॥ ध्यायेदजेशपुरुहूतमुखैःस्तुवद्भिरावीतमात्मपदवींप्रतिपादयंतं ॥३८॥
श्यामंस्त्रींद्रमितदीधितिकांतियुक्तंज्ञानंशरंचदधतंप्रिययासमेतं ॥ स्वात्मस्वरूपममितंहनुमन्मुखेषुसंदर्शयं
तमजितंस्मरतोरुगीर्भिः॥३९॥निजगोत्रंतुसोद्देशंपूर्वाक्षरपुरःसरं॥नत्यंतंतारपूर्वंचमनुरष्टाक्षरोमतः॥४०॥
तेचबीजेबीजभूतेधर्मादीनामशेषतः ॥ एतेविजयदामंत्राज्ञानमोक्षप्रदायकाः ॥४१॥ हिरण्यरत्नराज्यादि
समभीष्टसुरद्रुमाः ॥ कृष्णोगोविचकामेतःसोद्देशोवल्लवीजनः ॥ ४२ ॥ प्रियश्चतादृशःस्वाहायुगष्टादशवर्ण
कः ॥ पदैरंगानिसंप्रीतिकाममोक्षप्रदोमनुः ॥ ४३ ॥ ध्यायेद्धरिन्मणिनिभंजगदेकवंद्यंसौंदर्यसारमरिशंख
वराभयानि ॥ दोर्भिर्दधानमजितंसरसंचभैष्मीसत्यासमेतमखिलप्रदमिंदिरेशं ॥४४॥ सकामःस्वयमुद्देशी
नत्यंतोयंषडक्षरः ॥ तदादिरपिसर्वेष्टचिंतामणिरुदाहृतः ॥ ४५ ॥ दृष्टार्थएवमंत्राणांकलौवीर्यंतिरस्कृतं ॥ त
त्राप्युद्दीप्तवीर्याहिमंत्राअत्रप्रकीर्तिताः ॥ ४६ ॥ वासिष्ठवृष्णिप्रवरमंत्रास्तत्रापिवीर्यदाः ॥ स्वयंदेवपदारू
ढःपूर्ववर्णपुरःसरः ॥४७॥ नत्यंतोष्टाक्षरोमंत्रःप्रियोविज्ञानगोपतेः ॥ व्याख्याश्रीसर्वविज्ञानकवितादिगुण

प्रदः॥ ४८ ॥ वादेविजयदोनित्यंयथायुद्धेनृकेसरी ॥ ४९ ॥ विज्ञानरोचिःपरिपूरितांतर्बाह्याडकोशंहरितो
पलाभं ॥ तर्काभयेतंविधिशर्वपूर्वगीर्वाणविज्ञानदमानतोस्मि ॥५०॥ ज्ञानानंदपुरःपूर्णोविघ्नहेधीमहेतथा॥
तन्नःप्रेरणमध्येतुव्यासोमंत्राधिपाधिपः ॥ ५१ ॥ आदिबीजंस्थिरादोषज्ञानबीजंविमुक्तिदं ॥ सर्वपापक्षयक
रंसर्वव्याधिविनाशनं ॥५२॥ ध्यायेच्छशांकशतकोट्यतिसौख्य कांतिंसंसिच्यमानममृतोरुघटैःसुरेशैः ॥ व
र्णाभिमानिभिरजेशमुखैःसहैवपंचाशताप्रतिगिरंतमशेषविद्याः ॥ ५३॥ सोद्देशस्तुस्वयंदीर्घपूर्वार्णाद्योनमो
युतः ॥ सर्वविद्याप्रदोष्टार्णःप्रतिवादिजयप्रदः ॥ विमुक्तिसाधनःकीर्तिबुद्धिस्थैर्यप्रदःसदा ॥ ५४ ॥ वंदे-
तुरंगवदनंशशिबिंबसंस्थंचंद्रावदातममृतात्मकरैःसमंतात् ॥ अंडांतरंबहिरपिप्रतिभासयंतंशंखाक्षपुस्तक
सुबोधयुताब्जबाहुं ॥ ५५ ॥ नस्तोमुखादपिनिरंतरमुद्गिरंतंविद्याअशेषतउताब्जभवेशमुख्यैः ॥ संसेव्यमान
मतिभक्तिभरावनम्रैर्लक्ष्म्यामृतेनसततंपरिषिच्यमानं ॥५६॥ स्वयमुद्देशवान्पूर्ववर्णपूर्वोनमोयुतः ॥ सतारो
ष्टाक्षरश्चैवनवार्णश्चमनूस्मृतौ ॥५७॥ प्रोद्यद्दिवाकरसमानतनुंसहस्रसूर्योरुदीधितिभिराप्तसमस्तलोकं ॥ ज्ञा
नाभयांकितकरंकपिलंचदत्तंध्यायेदजादिसमितिंप्रतिबोधयंतं ॥५८॥ अधृष्यताज्ञानमोक्षप्रदौभक्तेष्विमौ

सदा ॥ सूक्तंदीर्घतमोदृष्टंविष्णोर्नुकमितिप्रभोः ॥ ५९ ॥ सर्वार्थदंगार्त्समदंयोजातइतिचापरं ॥ वासिष्ठंच परोमात्रयेतिज्ञानविमुक्तिदं ॥६० ॥ भौवनीयंसर्वकाममोक्षदंयइमेत्यपि ॥ एवमेवाखिलावेदाज्ञातव्याविष्णु तत्पराः ॥ ६१ ॥ स्वदृष्टंसूक्तमखिलकामदंहरितुष्टिदं ॥ वाचोंभ्रिण्याःश्रियोंगानिश्रीर्लक्ष्मीर्मेंदिरारमा ॥६२॥ कौशेयपीतवसनामरविंदनेत्रांपद्मद्वयाभयवरोद्यतपद्महस्तां॥उद्यच्छतार्कसदृशींपरमांकसंस्थांध्याये द्विधीशनुतपादयुगांजनित्रीं ॥६३॥ लज्जाबीजंचतद्बीजंतस्याएवाभिधायकं ॥ पाशांकुशौरक्तवस्त्रेलज्जा बीजेविशिष्यते ॥६४॥ अमध्ययुग्मस्वरगतेनैवांगमुदाहृतं ॥ सत्ताबीजंचदुर्बीजंतद्धदेवप्रकीर्तितं ॥६५॥ वर्णःश्यामोविशेषोत्रतांबूलंनीलमुत्पलं ॥ चक्रशंखौतर्जनंचशूलमित्यपरत्रच ॥ ६६ ॥ नमोंतःस्वेनसहित स्तदेवान्योमनुःस्मृतः ॥ दुर्गात्रिष्टुप्कश्यपोक्तातत्रवर्णोग्निवत्स्मृतः ॥६७॥ त्रिनेत्रत्वंचदुर्गायाःप्रायःसर्वत्रक थ्यते ॥ पादैःसमस्तेनतथाषड्वर्णेनांगमुच्यते ॥६८॥ रमायाएवरूपाणित्वेतानिहिविदोविदुः ॥ मुख्यतो जामदग्न्यस्तुदेवतास्यमनोःस्मृतः ॥६९॥ हिरण्यगर्भसूक्तंचभृगुदृष्टंप्रकीर्तितं ॥ ब्रह्मधातृविरिंचाजपाद्मैरं गमुदाहृतं ॥७०॥ ध्यायेन्निषण्णमजमच्युतनाभिपद्मेप्रोद्यद्दिवाकरसमूहनिकाशमग्र्यं ॥ मातृप्रकारकरमु

त्तमकांतिमद्भिर्वक्त्रैःसृजंतमखिलैःपरमार्थविद्याः ॥ ७१ ॥ स्वयमुद्देशनातेमांस्तस्यपंचाक्षरोमनुः ॥ स्वयमे
वापरोष्टार्णस्तादृशःसंप्रकीर्तितः ॥७२॥ बळाद्यंभृगुणादृष्टंप्राणाग्नेःसूक्तमुच्यते ॥ प्राणाद्यैःपंचभिस्तस्याप्यं
गान्युक्तानिसूरिभिः ॥७३॥ उद्यद्रविप्रकरसन्निभमच्युतांकेस्वासीनमस्यनुतिनित्यवचःप्रवृत्तिं ॥ ध्यायेद्गदा
भयकरंसुकृतांजलिंतंप्राणंयथेष्टतनुमुन्नतकर्मशक्तिं॥ ७४ ॥ प्राणाद्याःपंचमंत्राश्चतस्यदेवस्यवाचकाः ॥ उ
च्यतेहरिरप्येतैःसाक्षान्नारायणादिकः ॥७५॥ ब्रह्माण्याअपिभारत्यागौरीर्यस्तइतिश्रुतौ ॥ मंत्रौदीर्घतमोद्ध
ष्टौसर्वाभीष्टप्रदायकौ ॥७६॥ उद्यद्दिवाकरसमूहनिभांस्वभर्तुरंकस्थितामभयसद्वरबाहुयुग्मां ॥ मुद्रांचतत्त्व
दृशयेवरपुस्तकंचदोर्युग्मकेनदधतींस्मरतात्मविद्यां ॥७७॥ पादैर्व्यस्तैःसमस्तैश्चतदंगानिविदोविदुः ॥ स्व
यमुद्देशनत्यंतौमंत्रौद्वावपरौतयोः ॥७८॥ मंत्राएतेहरेःप्रीतिदायकाःसर्वकामदाः॥इष्टंदैवंहरिःसाक्षाल्लक्ष्मी
र्भाग्यस्यदेवता॥७९॥गुरुर्ब्रह्माथवायुर्वाविद्यादेव्यौप्रकीर्तिते॥तस्मादेतेप्रियाविष्णोरंतरंगतयासदा॥८०॥
ज्ञेयाश्चैवप्रपूज्याश्चविष्णोःप्रीतिमभीप्सता॥ उद्देशनतियुङ्मंत्रःस्वयमेवशिवस्यतु॥८१॥वर्णैरेतैस्तदंगानिवा
मदेवोमुनिःस्मृतः॥ पङ्क्तिशब्दार्थविज्ञानेनहिच्छंदसिसंशयः ॥८२॥ ध्येयःपंचमुखोरुद्रःस्फटिकामलकांति

॥७८१॥

मान् ॥ विद्युच्छुभ्रासितरजःश्यामान्यस्यमुखानिच॥८३॥जटावबद्धेंदुकलःप्रियायुङ्नागभूषणः॥ मंत्रेष्वेते
षुसर्वेषुवाच्यस्तारेणकेशवः॥८४॥अंतर्यामितयाध्येयःसर्वदेवेषुसर्वदा॥ सएववनितालिंगःपार्वत्यामनुरुच्य
ते॥८५॥गौरीवराभयकराध्येयापीतांबराचसा॥स्वयमुद्देशनत्यंतःपूर्वपूर्वःषडक्षरः॥८६॥सनत्कुमारदृष्टोयं
मंत्रःशेषस्यकामदः॥दधानोहलसौनंदौश्वेतवर्णःकृतांजलिः॥८७॥सहस्रमूर्धाऽद्वितीयकर्णभूषःप्रियायुतः॥
वनमालीनीलवासाध्येयोविष्णोस्तुपृष्ठतः॥८८॥व्यत्यस्तपक्षितारौचस्वाहांतोगारुडोमनुः॥ कश्यपोस्यमुनि
र्ध्येयःसुधापूर्णंहिरण्मयं ॥८९॥ दधानःकुंभमभयंपीतःशुक्लोरुणोहरिः ॥ कृष्णश्चाजानुतोनाभेःकंठात्कादं
तएवच॥९०॥प्रियायुक्पुरतोविष्णोःपक्षतुंडसमन्वितः॥ जंगमस्थावरविषहृदयंसर्वकामदः॥९१॥ मंत्राश्च
लोकपालानांनमोंताःसर्वकामदाः ॥ पीतरक्तासितश्वेतशुक्लरक्ताश्चवर्णतः ॥९२॥ सप्रियाःसाभयावज्रश
क्तिदंडासिपाशिनः ॥ गदाकुमुदशूलर्ष्टिखड्गिनोभूषणोज्ज्वलाः ॥९३॥ अग्निश्चस्वयमुद्देशीसनमःस्कंदवा
चकः॥कौशिकोस्यमुनिर्वह्निवर्णःषण्मुखउज्ज्वलः॥९४॥ धनुःशक्तिधरोध्येयःकामदोभयनाशनः॥ह्रस्वःकृपा
लुःसेतश्चस्वयमन्यःस्वयंतथा ॥९५॥ सतारोष्टाक्षरःसौरःक्रमव्युत्क्रमतःपदैः ॥ अंगानिपद्मयुगलधरोध्येयो

रुणोरविः ॥९६॥ सर्वव्याधिहरःश्रीदोवृष्टिदोयंमनुःस्मृतः॥मोनयदासाप्रप्रक्षिव्यत्यस्तोविघ्नराण्मनुः ॥९७॥
रक्तांबरोरक्ततनूरक्तमाल्यानुलेपनः॥महोदरोगजमुखःपाशदंतांकुशाभये ॥९८॥ बिभ्रद्ध्येयोविघ्नहरःकाम
दस्वरयाह्ययं ॥ तत्रतत्रस्थितोविष्णुस्तत्तच्छक्तीःप्रबोधयन् ॥९९॥ एकएवमहाशक्तिःकुरुतेसर्वमंजसा ॥ स्व
यमुद्देशवान्पूर्वपूर्वोहृदयसंयुतः ॥१००॥ धान्वंतरोमहामंत्रःसंसृतिव्याधिनाशनः ॥ अत्रोक्तसर्वमंत्राणांना
यकोपलसन्निभः॥१०१॥छ॥चंद्रौघकांतिममृतात्मकरैर्जगंतिसंजीवयंतममितात्मसुखंपरेशं॥ ज्ञानंसुधाकल
शमेवचसंदधानंशीतांशुमंडलगतंस्मरतात्मसंस्थं ॥१०२॥ मूर्ध्निस्थितादमुतएवसुधांस्रवंतंभ्रूमध्यगाच्चततए
वचतालुसंस्थात् ॥ हार्दाच्चनाभिसदनादधरस्थिताच्चध्यात्वाभिपूरिततनुर्दुरितंनिहन्यात् ॥१०३॥ अज्ञान
दुःखभयरोगमहाविषाणियोगोयमाशुविनिहंतिसुखंचदद्यात् ॥ उन्मादविभ्रमहरःपरतश्चसांद्रस्वानंदमेवप
दमापयतिस्मनित्यं ॥ १०४ ॥ ध्यात्वैवहस्ततलगंस्वमृतंस्रवंतंदेवंसयस्यशिरसिस्वकरंनिधाय ॥ आवर्तय
न्मनुमिमंसतुवीतरोगःपापादपैतिमनसायदिभक्तिनम्रः ॥ १०५॥ शतंसहस्रमयुतंलक्षंवारोगसंक्षयात् ॥
इममेवजपेन्मंत्रंसाधूनांदुःखशांतये ॥१०६॥ ज्वरदाहादिशांत्यर्थंतर्पयेन्मनुनामुना ॥ ध्यात्वाहरिंजलेस

सरात्रंजूर्तिर्विनश्यति ॥ १०७ ॥ अयुतामृतसमिद्धोमाद्गोघृतक्षीरसंयुतात् ॥ सर्वेरोगाविनश्यंतिविमुखो
नहरेर्यदि॥१०८॥भूताभिचारशांत्यर्थमपामार्गाहुतिक्रिया ॥ द्विगुणामृतयापश्चात्केवलेनघृतेनवा ॥१०९॥
आयुर्विवृद्धयेनित्यंजन्मनक्षत्रएववा ॥ चतुश्चतुर्भिर्दूर्वाभिःक्षीराज्याक्ताभिरिष्यते ॥११०॥ सर्वाःक्रियाहरौ
भक्तेहरिभक्तैःस्वनुष्ठिताः ॥ गुरुभक्तैःसदाचारैःफलंत्यद्धानचान्यथा ॥१११॥ ब्रह्मांतागुरवश्चैवसंप्रदायप्रवर्त
काः॥तत्तद्गुणानुसारेणपूज्यामान्याश्चकृत्स्नशः॥११२॥सर्वेभ्योभ्यधिकाभक्तिर्विष्णौस्यादतिनिश्चला॥लक्ष्मी
ब्रह्मादिषुततःक्रमेणस्यात्सुभाविता॥११३॥एवंविद्याःफलिष्यंतिनान्यथातुकथंचन॥शुभान्ध्यायंतियेकामा
न्गुरुदेवप्रसादजान् ॥११४॥ इतरानात्मपापोत्थांस्तेषांविद्याफलिष्यति ॥ मुक्तावपिचसंसारेनात्मनोविष्णु
तांक्वचित्॥११५॥ब्रह्मरुद्रादिभावंवासाम्यंवाधिक्यमेववा॥अतद्वशत्वमथवायःस्मरेत्सतुसिद्धिभाक्॥११६॥
नान्यथासिद्धिमाप्नोतिकल्पकोटिशतैरपि॥स्मृत्वागुरुंपूर्वगुरुमादिमूलगुरूंस्तथा॥११७॥देवतांवासुदेवंचवि
द्याभ्यासीतुसिद्धिभाक्॥अवज्ञातागुरूणांचदेवतानांनसिध्यति॥११८॥प्रयातिचतमोघोरंमंत्रावज्ञाकृदेवचा॥
यस्तारतम्यवेत्तास्याद्गुरूणांदेवतास्वपि॥११९॥भक्तिमान्गुरुदेवेषुतद्भक्तेषुचसिध्यति ॥ गुरुदेवप्रतीपानांवि

मुखस्तत्प्रियेरतः॥१२०॥अकामक्रोधलोभश्चनचिरात्सिद्धिमाप्नुयात्॥सकामेभ्योमितगुणाह्यकामैस्तुकृताः
क्रियाः॥१२१॥तस्मादकामएवालंभजेद्विष्णुंसनातनं॥ अयंमेहस्तइतिचमंत्रःपूर्वोक्तवत्स्मृतः॥१२२॥अत्रो
क्तास्तुक्रियाःसर्वमंत्रेष्वप्युपलक्षणं॥विजयस्तंभनादीनिनारसिंहैर्विशेषतः॥१२३॥जामदग्न्यैश्चकार्याणिराघ
वैर्यादवैरपि॥वाराहैस्तंभनंक्षिप्रंश्रीकराःकथिताःपुरा॥१२४॥बहुबाहुंमहाकायमुद्युक्तंचोद्यतायुधं॥स्मरन्वि
जयमाप्नोतिस्तंभनादींश्चकारयेत् ॥ १२५ ॥ वसुपूर्णकरंरत्नपर्वतस्थंविभावयन् ॥ वसुसिद्धिमवाप्नोतिसेव्य
मानमजादिभिः ॥ १२६॥ श्रियाविभूतिभिर्युक्तंभावयन्भूतिमाप्नुयात् ॥ यद्यन्मनोगतंतस्यतत्तदाप्नोत्य
संशयं ॥१२७॥ तथातथाहरिंध्यायन्क्रियास्तास्ताश्चसाधयन् ॥ श्रियेपद्मानिजुहुयात्संप्रीत्याउत्पलानिच
॥१२८॥ शरान्जयायजुहुयादभिमंत्र्यप्रयोजयेत् ॥ विद्यायैमंत्रितंवारिवचांवातुलसीमपि ॥१२९॥ ब्राह्मीं
घृतं(घृष्टं)सुवर्णंवाशतावृत्त्यातुनित्यशः ॥ अकुर्वंश्चक्रियांभक्त्यानिरपेक्षोभजन्हरिं ॥ १३० ॥ सर्वमेतद
वाप्नोतिविशेषेणनसंशयः ॥ सृष्टिस्थितिलयन्यासाःप्रातिलोम्यानुलोमतः ॥१३१॥ स्थित्यंताएववर्णानांश्रे
ष्ठाएवंचतुर्दश ॥ संहृत्यंतामोक्षिणांचएकविंशतिरेववा ॥१३२॥ पादहृत्केषुनाभ्यास्ययुक्तंचसललाटकं ॥

सनासिकासद्दग्जान्वासश्रोत्रंसोरुकंतथा॥१३३॥सोरस्कंचसकंठंचसभुजद्वयमेवच ॥ सगंडयुग्मंसालीकंस तुंडक्रोडकंतथा ॥१३४॥ समूलंचसगुह्यंचसपार्श्वद्वयमेवच ॥ सदोर्द्वयंव्यापकंचगलपार्श्वद्वयेनच ॥१३५॥ ककुत्स्तनद्वयेनापिपृष्ठमूलेनसर्वशः ॥ न्यासोयथाक्रमंप्रोक्तोमंत्रेष्वेतेषुकृत्स्नशः ॥ १३६॥ प्रतिमायामात्म निचन्यासोयंसन्निधानकृत्॥बीजांतःसाध्यमध्यंचविभक्तदलमंत्रयुक् ॥१३७॥वर्णानुप्रातिलोम्येनवृत्तंभूपुर संयुतं ॥ बीजसंदृब्धकोणंचयंत्रंरक्षादिसाधकं ॥ १३८॥ समंतत्सर्वमंत्रेषुजप्तंधार्यंतुवाभुवि ॥ विलिख्यमं डलेवातत्पूजयेद्धरिमंजसा ॥ १३९॥ प्रतिमालक्षणैर्यावद्व्यक्तआचार्यउत्तमः ॥ सर्ववित्तपसायुक्तआज्ञाश क्तियुतोहरेः ॥ १४० ॥ यावद्भक्तोयथालब्धैर्गुणैर्युक्तोथवैष्णवः ॥ गुरुःसत्संप्रदायज्ञस्तारतम्येनसिद्धिदः ॥१४१॥ उत्तमादुत्तमासिद्धिर्धर्ममोक्षादिषुस्फुटं ॥ तस्मादुत्तमआचार्यंलब्धेनातोवरंव्रजेत् ॥१४२॥ एकस्य शिष्यतांप्राप्यतदाज्ञांनविनासमं॥अवरंवाव्रजेदुच्चगुणश्चेन्नैवदुष्यति ॥१४३॥विशेषतोगुणश्चस्याद्देवेष्वप्येव मेवहि ॥ तस्मादुत्तममाचार्यंदेवेशंचाश्रयेद्धरिं ॥१४४॥ अपरोक्षदृशेरेवयस्मान्मोक्षोनचान्यथा ॥ अपरो क्षदृशिश्चैवश्रवणान्मननादनु ॥ १४५॥ सम्यङ्निश्चिततत्त्वस्यनिदिध्यासनयाभवेत् ॥ द्विविधासाचसंप्रो

क्ताविष्णुशास्त्रावमर्शनं ॥१४६॥ एकंध्यानंहरेरन्यच्चत्वार्यंगानितस्यच ॥ यमश्चनियमश्चासाप्राणायामइती
रितः ॥१४७॥ अहिंसासत्यमस्तेयंब्रह्मचर्यापरिग्रहौ ॥ यमाःशौचंतपस्तुष्टिःस्वाध्यायोहरिपूजनं ॥१४८॥
नियमावीरपद्मेचस्वस्तिकाद्यानिचासनं ॥ रेचकःपूरकश्चैवकुंभकश्चत्रिधास्मृतः ॥१४९॥ प्राणायामःस्मृतिं
विष्णोर्विनानियमउच्यते ॥ अधीतिस्मृतियुक्तोहिनिदिध्यासनमेवहि ॥ १५० ॥ प्राणायामेचविष्णोर्य
त्स्मरणंध्यानमेवतत् ॥ आसाशौचंप्राणयमोनिष्परिग्रहपूर्वकाः ॥१५१॥ तपआद्याःक्रमात्सर्वउत्तरोत्तरतो
धिकाः ॥ सर्वतःश्रवणाद्यास्तुमुख्यामुक्तिप्रसाधने ॥ १५२ ॥ अज्ञस्यश्रवणंश्रेष्ठमयुक्तेर्मननंतथा ॥ ध्यानं
निश्चिततत्त्वस्यतस्माच्छास्त्रावमर्शनं ॥१५३॥ स्वयंदशगुणंतस्माद्व्याख्यैकस्यशतोत्तरा ॥ अपरोक्षदृशाप्ये
षाकर्तव्याविष्णुतुष्टिदा ॥१५४॥ यइमंपरमंगुह्यंमद्भक्तेष्वभिधास्यति ॥ भक्तिंमयिपरांकृत्वामामेवैष्यत्यसंश
यः ॥१५५॥ नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः ॥ भवितानचमेतस्मादन्यःप्रियतरोभुवि ॥ १५६ ॥
शौचासनेत्वंगमात्रंनपृथग्धर्मकारणं ॥ प्राणायामादयस्तुष्टिपर्यंताद्विगुणाधिकाः ॥१५७॥ स्वाध्यायोतः
कोटिगुणस्ततोनंतगुणाहरेः ॥ पूजातत्त्रिगुणंध्यानमितिधर्मक्रमःस्मृतः ॥१५८॥ ऊर्वोरधःपदोरूर्ध्वविभागे

नेतिचत्रिधा ॥ आसनत्रयमुद्दिष्टंमंत्रस्मरणपूर्वकं ॥१५९॥ द्विगुणोत्तरंरेचकादिषोडशादिक्रमेणतु ॥ मा
त्राणांह्रस्ववर्णस्यकालोमात्रेतिशब्द्यते ॥ १६० ॥ क्रमेणैवाभ्यसेन्मात्रांवृद्धिमेकाग्रधीःपुनः ॥ रेचयित्वादक्षि
णतःपूरयित्वाचवामतः ॥१६१॥ कुंभकश्चसुषुम्नायांविष्णुंवायुंचसंस्मरेत् ॥ मूलाधारंसमारभ्यत्वामूर्धानमृजु
स्थिता ॥१६२॥ मध्येसुषुम्नाविज्ञेयावज्रिकार्याप्रकाशि(नी)का॥वैद्युताब्रह्मनाडीतिसैवपंचप्रभेदिनी॥१६३॥
पृष्ठवामाग्रदक्षांतभेदास्तेषुक्रमेणतु ॥ हरिर्नीलःसितःपिंगोलोहितश्चात्रकेशवः ॥ प्रद्युम्नादिस्वरूपेणध्येयःसि
द्धिमभीप्सता॥१६४॥मूलेचनाभौहृदयेंद्रयोनिभ्रूमध्यमूर्धाद्विषडंतकेषु ॥ चतुःषडष्टद्विचतुर्द्विषट्कदलेषुपद्मे
षुसितारुणेषु॥१६५॥पंचात्मकोसौभगवान्सदैवध्येयोहृदंतान्यरुणानितानि ॥ त्रिकोणवह्नौचषडश्रवायौद्वि
स्तावदश्ररविवृत्तशशित्रिवह्नौ॥१६६॥वृत्तेविधावपिविचिंत्यमिदंदशार्धरूपंसितंतदखिलंहृदयात्परस्थं ॥ इडा
चपिंगळाचैववज्रिकाधारिणीतथा॥१६७॥सुषुम्नायाश्चतुर्दिक्षुवज्रिकाद्यासुतत्रच ॥चतुर्मूर्तिःसभगवान्हृदये
संव्यवस्थितः॥१६८॥द्वासप्ततिसहस्राणिनाड्योन्यास्तुप्रधानतः ॥ बृहतीसहस्रस्पर्शानामृचांवाच्योत्रकेशवः
॥१६९॥रूपाणांलक्षणंतेषांरहस्यत्वान्नकथ्यते॥१७०॥विष्णुनाब्रह्मणेप्रोक्तंग्रंथसंकोचतस्तथा॥खंडस्मृतिर्धा

रणास्यादखंडाध्यानमुच्यते ॥१७१॥अप्रयत्नात्समाधिश्चदर्शनंचिरयानया ॥ अथवासततंशास्त्रविमर्शेनभविष्यति ॥१७२॥ परमस्नेहसंयुक्तयथार्थज्ञानतोभवेत् ॥ साभक्तिरितिविज्ञेयासाधनंभोगमोक्षयोः ॥१७३॥ मुख्यमेषैवनान्यत्स्यात्सर्वंव्यर्थतयाविना ॥ सैकाप्यभीष्टफलदामोक्षोदर्शनयुक्तया ॥१७४॥ दर्शनंचतयाहीनंव्यर्थमन्यत्किमुच्यते ॥ योग्यंतुदर्शनंनैवतयाहीनंभविष्यति ॥१७५॥ आनंदचित्सदितिपूर्वगुणैःसमस्तैर्मर्त्यादिभिर्विधिपरैर्भगवान्क्रमेण ॥ ध्यातोधिकैरधिगुणोधिकमेवसौख्यंमुक्तौददातिसततंपरमस्वरूपः ॥१७६॥ निर्दोषाखिलसंपूर्णगुणेनहरिणास्वयं ॥ ब्रह्मणेकथितात्तंत्रसारादुद्धृत्यसादरं ॥१७७॥आनंदतीर्थमुनिनाकृतोग्रंथोयमंजसा ॥ ग्रंथोयंपाठमात्रेणसकलाभीष्टसिद्धिदः ॥१७८॥ किमुज्ञानादनुष्ठानादुभयस्मात्पुनःकिमु ॥१७९॥ यस्यत्रीण्युदितानिवेदवचनेरूपाणिदिव्यान्यलंबद्दतद्दर्शतमित्थमेवनिहितंदेवस्यभर्गोमहत् ॥ वायोरामवचोनयंप्रथमकंपृक्षोद्धितीयंवपुर्मध्वोयत्तुतृतीयमेतदमुनाग्रंथःकृतःकेशवे ॥१८०॥ अशेषदोषोज्झितपूर्णसद्गुणंसदाविशेषापगतोरुरूपं ॥ नमामिनारायणमप्रतीपंसदाप्रियेभ्यःप्रियमादरेण ॥ १८१ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमत्तंत्रसारसंग्रहेचतुर्थोऽध्यायःसंपूर्णः ॥ ४ ॥

तंत्रसारसंग्रहःसंपूर्णः ॥

The Credit of getting the Sarvamoola Books Scanned goes to Panditavareenya ityaadi birudankita Shreemajjaalihaala Shreenivaasaachaaryasya Vidyaa Suta, "Gomanjari" Udgrantha kartru, (Raghunatha suri virachita Manikya manjari granthasya Khandana Grantha) Veda Shaastra Puraanaartha Vishaarada, Panditavareenya Shree Dwarakaanaathaachaaryaru. My heartful salute for him to provide me such a wonderful opportunity to work on this project.

Project Started on : 21 December 2009
Project Completed on : 20 March 2011

Scanned By : Aravindacharya Haranahalli, aravindbharadwajhs@gmail.com